पु॰ ६

१२२

अथश्रीरामावयवमंजरीप्रारंभोविजयतेश्री:

1

श्रीगणेशायनमः ॥ श्रीगुरुवर्यरामपादुकाभ्यांनमः ॥ श्री अर्द्धनारीश्वराभ्यांनमः ॥

अखिल

नारायणाख्यपितरं विद्योद्बोधकमहं सदा नौमि ॥ ध्वांतध्वंसैकदीक्षितधुं

डिराजगुरुवर्यं ॥१॥ आर्यां प्रणयिनमस्कृत्सदर्थविद्योपदेशनिपुणतमं । सद्वृत्त

गांगाविंहाश्रयं प्रवंदे महादेवं ॥२॥ श्रीमद्रामपदांबुजं विजयते देवेंद्रभूपोज्वलश्रा

च्छेखरकोटिलग्नरत्नमनोद्दामस्खलत्सांसकलं । वैदेहीप्रणयार्द्रसांद्रविशदस्व

हामरंदं मरुत्पुत्रप्राज्यस्कभक्तिमंजुवचनद्वैरेफवादांचितं ॥१॥ शार्दूलविक्रीडितं ।

यदीयपदपंकजस्थितसदंगुलिश्रेणिका । किमत्रमदनःशरान्निहितवान्स्वकान्कौस्कु

१

समुत्क्षिप्यते

मानं। धराधिकमथांशुभाकृश्चतिगणोऽपि भूतोत्करं यथादितिजनैर्भृशं बकुविधं समाक्षिप्यते। २। पृथ्वीवृत्तं। नखामेभूयास्फुरद्दिरघुकुलेंद्रस्य चरणप्रभासंक्रांताले विगलदनुरागैः प्रणयतः। हृदःक्षोणीजाया अपिस्फुभगरक्ता निजमयाहसंतः प्राच्येंदुं समुदितरविं रत्ननिकरं। ३। शिखरिणीवृत्तं। चंद्रे प्राचीं दिशामुपगते सारसानां विकासो स्तत्रस्थेऽर्के भवति कमलामोदगर्भसरोपि। एवं रत्नासनवसति भिर्जानकीनायकस्य पादाब्जोत्थैर्नखवरविधुभिर्धुतलौकवादो निरस्तः। मंदाक्रांता। ४।
अतिशयमृदो प्राप्तेपत्रे रसग्रहलोलुपभ्रमरनिवहन्रमश्रुस्तोमो यथा कुचद्वयपने।
असितवदनैर्बद्धघ्राब्जोलबंगकुलैः सदाजयतिविततारोमश्रेणिर्दशास्यरिपोस्तथा। ५। हरिणी।

श्री

मदननृपतिनाखं जैत्रवादित्रभेरीयुगमखिलजयांतेन्युज्ञभूतंमनोज्ञं॥ कृतमिवरघुना
थांघ्र्यगुल्फद्वयंतज्जयतिकलरवाद्यैर्नूपुराद्यैर्विशिष्टं॥ मालिनी॥६॥ वात्स्यायनव्यास
मतानुकूलस्वानंदपीयूषघटाविवस्तः॥ किंवायदीयावतिगूढरोभौगुल्फौमुमुक्षुत
मकामिमान्यौ॥ इंद्रवज्रा॥७॥ सन्नालपंकिलकुशेशयकंदरम्यंजंघायुगंतस्यविजं
यतेपुरुषात्तमस्य॥ स्थास्नोश्च्वजंगमगणस्यनिदानमत्रपत्राायितंहिचरणांगुलिवृंद
मस्ति॥८॥ वसंततिलकं॥ यज्जंघेजलधिसमुत्थमीनभोगप्रागल्भ्यंकिमुवहतः स्फचल्गु
भोगे॥ तद्वंद्वंप्रावलितमुखाद्र्लग्ननीलरत्नश्रीस्फभगमदर्शिजानुयुग्मं॥ प्रहर्षिणी॥९

२

4

यज्ज्ञान्चोर्युगुल्कमनंदितं समुद्रक्षिप्ताद्रिप्रसभनिमज्जनाचकारे ।। संगघल्कमठरारी
रविघ्नुघ्छसौभाग्यभतिमुडलं चकास्त्कचिन्हे ।। प्रहर्षिणी ।। १० ।। अर्चिः पथानुगमत्री
मुनींद्र — लस्कपुण्ययोगिधूमाख्यमार्गगतियुग्जनयोः किमुस्याद । उरुयुगं भगवतः स्त्रिदिवा
धिरोहदंडद्वयं विधत्तना भिस्फुरस्थलस्य ।। ११ वसंततिलकं ।।। आकंठमज्जदमरीकब
रीकदंबानीलायितामरधुनीयमुनौघयुग्मं । उरूद्वयं किमुतसंगमभूर सुष्पयष्ट्री कटि
विजयते किमुतीर्थराजः ।। वसंत० ।। १२ ।। दुःसाध्यासनसंघ[illegible] योगानिपुणस्यारुद्वयस्य — क्लिष्टार्थला
सांख्य — प्रभोः स्यानदधीनमेवह्रितागः सांख्यायितस्यापि च । घंटाव्याहतनादमुख्य [illegible] कघां — दनादरणीय
सनौ — मतसंद्व ।। २

रम्य २

वरः संगमो मूलाधारभु भास्थितौ विजयते वेदांततत्त्वाकृतौ ॥ शार्दू ॥ १३ ॥ इंद्रनीलमणिनिर्मि
तेष्टका भाग्यमावहति वस्तिका ॥ किं च नु विधिस्क विष्टराब्जमोस्पर्द्धिनी द्वारथांगजन्मनः ॥
रथोद्धता रत्नं ॥ १४ ॥ नाभिः पीयूषकूपः किमु भुजगपतिस्पर्द्धि रोमालिगर्तः किं वा रम्यालवा
लं स रत्नविटपिनो यामुनांबुह्रदो वा ॥ बाणासंधानभाजो भृगुकुलतिलकाद् आहृतस्या
विशंकं छायारामोदरांतर्विलसति धनुषो नाभिदंभेन किं वा ॥ स्रग्धरा ॥ १५ ॥ श्रीविष्णुना
भिकमलेन समानदीप्तिर्नालायिताहृद्यमपभ्रविराजिनी किं ॥ रोम्णां ततिर्भगवतो हृ
दि भाविता चेद् दूरे जनैर्जनिमृतिप्रभृतिक्षयं सा ॥ वसं ॥ १६ ॥ त्रिवलीमिषधारिगुणत्रित

३

यीपरिवर्तनतः सगुणः किमजः॥ उदरं निगमत्रितयी स्थितितः स्फुरतां जयती निनुनिर्गुणवर॥
तारकरत्नं॥१७॥ यद्वक्षः कमनीयकांति विजितारम्याः कृपालयोदार्ढ्येणापि च वज्रपर्व
तशिलासंघाश्च संस्फोटिताः॥ श्रीवत्सस्तु तदा मनोहररुचिः संघट्टणांको भवच्चिता
दार्ढ्यमनाकुलं निरसतु श्रीरामभद्रः स मे॥ शार्दू०॥१८॥ दरकमलगौरथांग शार्ङ्ग भास्वद्युं
गमितविधु करोत्पलं लीयलक्ष्मी॥ दधदहितकुलांतकोपि चेको जयति करो रघुराजवंश
केतोः॥ पुष्पिताग्रा॥१९॥ नरहरिवपुषो नरवाः स्फुरद्दिड्म प्रभुहृदये प्रबभुर्यथा निविष्टाः
अरुणमणि निभा हि पुष्पिताग्रा जयति करव्रततिद्वयी प्रभोर्नु॥२०॥ पुष्पिताग्रा॥

दा

विलग्ने

निरंतरसंरंभमदद्रविरथांगचक्रं वरं दत्रास्यहतिकल्क रांगुल्लिपुरःस्थपर्वस्थितां ।। स्क रथांग
भर चक्रशुभमंडलीमभयदां स्करे रखायुधं निरीक्ष्य नरवचंद्रिकाम्रतां नुजिहेतिवा ।। पृथ्वी ।। तर
कंदौसं३ २१ ।। भौजंगनिर्मोकलघुप्रशास्तं वस्त्रं ~~...~~ वलितं विभाति ।। कुंदेंदुकैलाससितं
नलीनमिक्ष्वाकुवंशप्रथितस्य राज्ञः ।। इंद्र० ।। २२ ।। पाश्चात्यसांध्यरविरश्मिविहारिणा च
शीतकरर प्राक्प्राप्त ~~चंद्रकरसंकर~~ कांतिभाजा ।। वस्त्रं यदीयममलं नभसोसदक्षं कौशीयतंतु
परम्परुणन भिरलं रतमंततः किं ।। वसं० ।। २३ ।। गुणेषदाकृष्टधनुःसदक्षों गुष्ठोदरस्थो हियवो विर
सघः ।। ३ भाति ।। पुरंदरे धास ~~...~~ तदग्रभाकृतस्क संमुखाभांतरतुल्यरूपः ।। वंशस्थं ।। २४

६

साके ताधिपमानसोल्लवन प्राचीनसूर्यप्रभुश्रीपाण्योर्नवनीत मार्दवमुषो रक्ता अशोभा
जुषोः। अष्टाविंशतिपर्वसु प्रवितितं संस्थापिताः प्रायशो विद्याभांति चतुर्दशाधमनवख्याता
लयासंख्यया॥२५॥ शा०॥ यदीयमणिबंधको माणिगणप्रभारोधको स्वभक्त जनता शिरः
कृतकरातपत्रस्थिती॥ नमाम्यभयदोत्तमौ भुजभुजंगकंठायितौ वल्लौकिकरुचेर्निधी कर
सरोजनालायितौ॥ पृथ्वी॥२६॥ यत्कूर्परौ भवभुजंगकठोरदंष्ट्राप्रोत्पाटणेनुकृतकीतलकदंभ
युक्तौ॥ कल्हाररम्यकलिकास्कुषुमौ दधानौ भास्वभुजांगदरुचिप्रतिभासमेतौ॥ वसं०॥२७
कूर्पराधःप्रदेशौ मनोज्ञौ धनुर्ज्याप्रघातात्खरौ नागभुंडाकृती॥ ~~भवेतां नृणां शोकहंतोदीदिन~~
~~स्वजभोग्याप्रघाति भवतां भजनस्य~~॥२८॥ स्त्राग्विणी वृत्तं॥ श्री रामायनमः॥ ॥
राक्षसेक्ष्कक्षतोदी। दितस्यप्रभोश्चापधृक्कुमाभ्यान्यशौर्यस्य भातो धृवं॥३

मुनींद्रामरैर्वंद्यमानस्यराज्ञे। महीभारनिर्वाहधुर्यौभुजौ हि ॥ प्रकामंभवोद्भूतदुःखैघभा
रक्षणात्रोगहीनाधिकारौ विभातः ॥ भुजंगप्रयातं ॥ २९ ॥ निजासनविराजिता औपतिरश्मिजा
लप्रभा प्रकाशितनभःस्थलीसहस्रतांदधातिप्रभोः ॥ मुखेंदुकिरणायितप्रखरकुंडलेद्भा
सितास्फारसममौक्तिकस्रगुपलक्षितांसस्थली ॥ पृथ्वी ॥ ३० ॥ जलधिमथनेमध्यगछन्ने
भुजंगमवेष्टितो विलसतियथाद्रौ लोग्रीवा तथा कि मुहारिणी ॥ त्रिवलि विवृतास्कंधद्वं
द्वांतराल विराजिता कुसुमधनुषःकंबोर्निंदांकरोतिनिरंतरं ॥ हारिणी ॥ ३१ ॥ कंठस्थरेखा
त्रयकैतवेन वेदत्रयी भातिशुभेति मन्ये ॥ सप्तस्वरोत्पत्तिनिदानभूतंग्रामत्रयं संस्थितमेव
नान्यत ॥ इंद्रवज्रा ॥ ३२ ॥ कपोलेंदोःशोभेतेशिवमुकुरसंस्था नयनगानलेद्भ्रमरयामार

थघनमलिनाभाति पदिकी॥ यथाजत्रु द्वंद्वं जयति नुतथागूढ स्कधुमं स्कमुक्ताशमस्याद्व
नमि चरणोद्धूलिमलिनं॥ शिखरिणी॥३३॥ भूमौ स्तंभायमानोप्युपरि चवितलतोमेरुशैलः
समंता स्रोद्यद्वृक्षाग्रपुष्पप्रकरमिलदलि श्यामलोभातियद्वत्॥ रामग्रीवाविभातिप्रवि
र्तति हनुयुक् सांद्रनीलातथाकिं धूर्तस्यप्राज्यनीलंकुस्कममिवशुभा राजतेकोमला वा॥
स्रग्धरा॥३४॥ मुद्दमंतौकरक स्कंकौरकीयशोभां रामोष्ठौ विजयतइंदिरामनोज्ञौ॥ यद्वा किं
शुककलिकाछविंदधानौ शोभेतेनवरसदानदक्षदक्षौ॥ प्रहर्षिणी॥३५॥ वारांप्रवाह इव
भातिकिमुप्रसन्नंश्रीमत्स्मितंद्युसरितोरघुनायकस्य॥ ओष्ठौ महार्घमणियुक्तरभास
मानौ शंकेरमाकलितमुरव्यरसौ स्कचारु॥ वसं०॥३६

लोके यं नियमो जयत्यविरतं प्रोद्धूय कंदाद्बहिर्लोकं वासयति स्वयं कुवलयं चंद्रार्कसान्निध्यतः॥ नीरे गच्छति पुंडरीकनिकरो नो रोधसः प्रोद्गतो दंताक्षः शशिसूर्ययो विलसतोरद्यापि चित्रं न किं॥ शार्दू०॥ ३७॥ विकासाय न्नाभूद्दकुमुदसंघे ऽदकचितं रवावस्तं याते समुदयति नैशं कुवलयं। विधौ लीने चाविर्भवति कमलं सूर्यशशिनोः सतोरत्रस्या किं नयनमिषयोः पद्मविभवः॥ ३८॥ शि०॥ एकैकापि कला प्रकाशनकृतौ दुःकलाः षोडशास्त्री कांकुस्य मुखेंदुनिर्जिततनुर्द्धारद छद्मना॥ द्वात्रिंशद्वि निजा विधाय कुशलो लिख्येतदास्यनुवानाश्रयं हि पराजयात्तु महतः श्रेयस्करी लीनता॥ ३९॥ शिखरिणी॥

६

अन्योन्यस्पर्द्धमानौ सजलघनगणस्पर्द्धिनौ नागवर्यौ वल्मीकान्निःसृतौ यत्तुलित नपरिस
रायो धने संमुखौ स्तः॥ तद्वत्कंदर्पभूपप्रणुतशिवपदः श्मश्रुणी राघवस्योद्भासेते कौस्तुनी
लेकुवलयमुकुले स्वर्णदीतीरलग्ने॥ स्रग्धरा॥ ६०॥ पुन्नागपुष्पस्य षडंघ्रिशोभां रामस्य
नासानुकरोति तस्मात्॥ स्यात् श्मश्रुचिन्हाहि विवादभंगे माध्यस्थ्यसंपादनमाश्रयस्मात्॥
इंद्र०॥ ६१॥ यद्दाडिमी बीजसमद्युतिश्री रामोष्ठयुग्मं प्रतिभासतेऽतः॥ स्वास्याद्वजंबूफलकां
तिरम्या नीलाप्रभा सूनासेवभुकस्य रम्या॥ सेव॥ ६२॥ कपोलद्वंद्वं किं जयति रघुवीरस्य वि
मलं स्वतः शुक्लायाः प्रतिफलितदूर्वासितरुचेः॥ वियत्कल्लोलिन्याः हसितस्फुभ गायाः स्फु

गया

रसी युगं श्रोत्रे नेत्रे क्रमशः इहतीर्थेचकमले॥ ६३॥ शिखरिणी वृत्तं॥ ॥ ॥

इं

मध्येसूर्यस्रुतोविधुःकविरतःपार्श्वेस्थितोभास्करोभौमःप्रांततआविरस्तिधिषणःपक्ष्मा
धआलोकने।।सौम्यःपक्ष्मयुगेतुकेतुतमसीचेत्थंनवानुग्रहश्चक्षुर्विभ्रमआश्रुनाशाय
तुमेदुःखंग्रहोत्थंध्रुवं।।शा०।।६४।।प्रांतरक्ताब्जसंयुक्तंमध्येनीलोत्पलांचितं।।पार्श्वयोःपुं
डरीकांकंनेत्रंसरइवाबभौ।।अनुष्टुप्।।६५।।भ्रूकवीवस्रुमतीन्टपप्रथममान्यनाम्नोविभोः
स्रुकेतवत्दलासितेमदनविन्यचापद्युती।।विलोचनजलेछयाश्रवणरंध्रतोनिःसरद्विरा
जतेश्चलंचलंकिमुष्णभंभुजंगीद्वयं।।पृथ्वी।।६६।।लावण्यनिधितड्डालंबस्रुधाघ्रायमा
सितः।।अष्टम्येंदुरिवाभातिसीताभाग्यंनुहिमूर्तिमत्।।६७।।भ्रूरूपोरगकन्यकाफणमणि
प्रोद्यच्छिखाकेतवंकाश्मीरागरुचंदनादिरचितंरेषायुगंदीप्तिमत्।।कस्तूरीतिलकोविभाति

८

विमलो मध्ये तयोर्वर्तुलो विघ्नक्रांतलतास्कपुष्पविलसन् श्रीरामभाले वरः ॥ श्रा ॥ ४८ ॥
अष्टम्येंदुसदृक्षहीरघटिते सिंहासने प्रांततः संविष्टो निजभोगसंवलनतः प्रोद्यत्फणामंडलः ॥ नागेंद्रो धवलश्च काष्तिनुपथारोपितथोष्णीषकं तल्लांतश्च वस्कवर्णयुक्फणमणेः शोभां दधाति प्रभोः ॥ श्रा ॥ ४९ ॥ हिमगिरिशिखराधो निःसरद्गांगनीरप्रपतनिकरशोभी स्कंदराघ्नीषवत्तः ॥ श्रवणविवरलंबी मौक्तिकश्रेणिसंघो ह्युपहसति रामां कोऽद्भुतपीयूषबिंदून ॥ मालिनी ॥ ५० ॥ शिरस्त्रमध्येनुपमप्रभो यो हीरांकुरत्नेसवरो विभाति ॥ दशांगुष्ठोर्ध्वप्रसृता सुषुम्नानाडी जगज्जीवनिकानुयासः ॥ ५१ ॥ उपेंद्रवज्रा ॥ भक्तास्त्वदीयाः प्रवृत्ताः प्रकामममस्माभिरियाळपितुं मुमुक्षः ॥ [illegible] स्कंधांका मुक्ताः स्फ
चलस्थाः ॥ किं मुक्तयः कुंडलिनीभूताः ॥

दशाक्षरोविभातिकत्रा ॥१०॥ श्री ८

मुक्ताहारो हृदि विजयते रामचंद्रस्य चारु र्नक्षत्राणि ग्रथितवि भवानी हसंती त्रिलोकैः ॥ तर्कयं
ते प्राज्ञाः खिलभुवने नैवदृष्टं प्रसिद्धं मुक्ता हृद्यं निरति शायत स्त्वी दृशं दीप्तिशालि ॥ मंदाक्रांता ॥
५३ ॥ हारा धो विलसति निष्कवल्गुली हः संध्याभ्रे खिलभगणांत वर्तमानः ॥ शुक्राख्योग्र
हइव नूतनाद्य लक्ष्मी प्रोन्माथि प्रभु हृदये स्फुचंद्रिकश्च ॥ प्रहर्षिणी ॥ ५४ ॥ सौदामिनी द्वित
यमंबुदकं ठलंबी रुक्माद्रि हृत्रिपुरटी स्यकण्ठे नितांतं ॥ प्रांते विमिश्रमिव भाति यथा तथो

विधु

किं राभोत्तरीयकपरः शशिरश्मिगौरः ॥ वसंत० ॥ ५५ ॥ कौंकुमांगरागपत्रयोजनाविलासि
तं राघवस्तनांतरं भुजौ च शोभतेधिकं ॥ राक्षसांतकाल वन्हिदत्त जानकी समालिंगने शिखाकंद
वकं तु लग्नमस्य किं ॥ तूणक वृत्तं ॥ ५६

८

श्रीरामं। विरहानलोपि विपुलोः पृथ्वी स्कृता संगतं दृष्ट्वा स्वस्पनकार्यमत्रफलितं भूयादि
तीक्षाकुलः। काश्मीरीयविशेषकौघरचनाव्याजाद्वहिर्निर्गतः सीताशुद्धिविधायकं
किमुमहावान्हं प्रवेष्टुं तदा॥ शार्दू०॥५७॥ वक्षःस्थितां जलधिजां जनकस्यकन्यावीक्ष्यप्रो
षमभियास्यतिनिश्चयेन॥ इत्थं चकार हृदये निजपाणिमस्याः संगोपनार्थमिखिलामर
वंद्यपादः॥ वसंत०॥५८॥ न्यासं विदेहभवने बहुजीर्णचापं भंक्त्वा यशः स्कृविमलं समवा
समाशु॥ केनेति भार्गवपतौ वदति क्षितीशश्चक्रे करं निजभुजांतर एव वीरः॥ वसं॥५९
कृशानुरपिशीतलो भवतु खाच्च तारागणाः पतंतु हिमपर्वतस्त्यजतु वा हिमानी सदा॥ ॥

17

भवेत्प्रतिज्ञा॥सती॥।

विधायहृदयेकरंभरतमाषभाषेविभुर्वयंरघुकुलोद्भवानहिवदामिमिथ्यांकिंचित्॥पृथ्वी॥६० हृदयविरमकष्टादानयिष्येनवद्यांझटितिधरणिकन्यांरात्रिगामींद्रगेहात्॥इतिकथितु मिवासौनीरमान्योपिरामोहृदिनिजकरपद्मंस्थापयामासकिंवा॥मालिनी॥६१॥ संग्राह्योनभयतिरावणानुजोयंनःशत्रुर्वदतिकपिव्रजोपिरामः॥संरक्ष्यःशरणगतोरि पुर्हिसाक्षान्मेनिस्संकरमकृणोद्धृदीतिचोक्त्वा॥प्रहर्षिणी॥६२॥हिरण्यकशिपुर्मयाक्ष णतएवलोकांतरंप्रयापितउमापतिप्रणतिलब्धवीर्योपिमे॥पुरोलघुरसावरंपरिचर त्यहोरावणोहनाम्यहमिमंलितिस्वहृदिपाणिमुक्ताकरोत्॥पृथ्वी॥६३॥ श्रीराम

स्फुरेंद्रचतुराननप्रभृतियोगिसंमोहनातिशायिवलउसं लुसल्लघुकयाक्षसीतापतेः॥ ममापिमृगरूपधृक्सुरट शोभितांगोस्फुरः करोतिकिमुमोहनंत्विति करोऽस्य ह्यधा हृदि॥१॥ वीररसमोषकलहस्तोकोयमुपेक्षणीयइतिकेचित्॥

चतुर्दशसहस्त्रका-क्षणतएवरक्षोगणाननाशयमरं पुराप्रथितवीर्यभाजोपिमे ।। जहाररम
णीसतीं तदधुनाम्मनुषुत्रजंनिरीक्षतुरिपुः स्मराइतिकरंहृदिन्यस्तवान् ।। ६४ ।। संवत्सरंशा
त्रुगृहे वसंती स्त्रीत्वाच्च चापस्यरवनिर्नमेद्या ।। योगेप्युत्ति रामोहृदयेस्वपाणिंकृत्वाबभा
षेनुकलंकशून्यां ।। इंद्रव ।। ६५ ।। रामोहृदब्जेस्वकरंदधानोभवद्भिरेवाहमरण्यवासी ।।
संस्थापितोद्राकृवस्कंधाधिपत्येसुग्रीवमुख्यानवदन्नदेवं ।। ६६ ।। अभयागतस्यकइहा
स्तिमानवः शरणंभुवीतिगगनोद्भवांगिरं ।। नृपतिर्निशम्यहृदयेकरंतदायमहंनिविष्ट
इतिरात्वरंदधौ ।। मंजुभाषिणी ।। ६७ ।। परात्माकुत्रविज्ञेयइतिसौमित्रिणाविभुः ।। स्पष्टो
हृदिकरंचक्रे यदस्येदंपरंपदं ।। ६८ ।। जगत्कुतोभूत्कनुलीयतेलं वदेतिस्पष्टो रघुवंशकेतुः ।।

सदैवमे प्रादुरभूच्चलीनं करं हृद्‌ब्जे विदधान आह ॥६९॥ साक्षिप्रत्यक्षगम्यो मम हृदयम

यं पुष्कलानंदभावो मलापर्याप्तमेतत्सफलमिति करं धानिःसरेत्किं हृदब्जात् ॥ विश्वामित्रा

दियोगिव्रजहृदयधृतो देशिकेंद्राघ्रिसेवालभ्यस्तस्मात्पिधानायितमवनिपतिर्दक्षिणं पा

णिमाधात् ॥ स्रग्धरा ॥७०॥ यदा कुशलवौ मखे कलमगायतां राघवे स कौतुनुभुविकस्य वा ।

प्रवदतीति वल्मीकभूः ॥ रघूत्तमकलत्रजाविति बभाष आरान्मुदा ममैव किमु दारकाविति

करं हृदब्जेऽन्यधात् ॥ पृथ्वी ॥७१॥ प्रतापरविभास्वरं यदभयार्थनासंमिलत्स्वभक्तजनच

क्रयुग्द्विजकराब्जमाधाद्विभुः ॥ उरःस्थराघवोरसहेजनककन्यकाह्लादके विरोधपरिहा

रको दिवसशर्वरीपर्ययोः ॥ पृथ्वी ॥७२

१०

वक्षःस्थलं क्षितिपतौ विनिधाय हस्तं शाखामृगाः परसखाय इमे मदीयाः॥ स्थाप्यास्त्वया
भुवनीति विधेयाः सांतानिकं ननु वसंलि तिवाक्यमाह॥ वसंत०॥७३॥ कौसल्याहृदयपयोधि
तोषहेतुर्निर्दोषो दशरथचक्र हर्षकारी॥ वर्द्धिष्णुः प्रबलतमोविनाशदक्षः क्षोण्यं के विलस
ति कोपि रामचंद्रः॥ प्रहर्षिणी॥७४॥ श्रीमान्भास्करवंशपोषणकरः स्कंदप्रियाकाननप्र
ध्वंसैकुतुका ज्जयत्यनितरां वल्मीकभू ज्ञापनात्॥ विश्वामित्रमखारिराक्षसमृगव्यापा
दनाद्बोधयन्रामः ७ शांभवचापयष्टिदलना शार्दूलविक्रीडितं॥७५॥ पित्राज्ञावशगो
गुरुादरयुतः सच्चित्रकूटप्रियो राज्यादिष्वविषक्तबुद्धिरमरैर्मान्यो नसूर्यार्चितः॥ ॥

गंगातीरसमाश्रितः खरमदध्वंसी मनस्वी जटी मारीचेक्षणकृन्मुनीन्द्रबहुवर्द्धिभ्राजते भूमिपः ॥७६॥ सीतारोधनवान्कबंधमरणः शाखामृगै रंचितो वातोद्धूतविलासहृत्स्कुकलिकः क्षारोदसेको त्सुकः ॥ पृथ्वीजाप्रणयी च पुष्पकयुतस्ताराधिपोद्भासितो राज्यावाप्तिमहाफलो विजयते श्रीरामकल्पद्रुमः ॥७७॥ वैदेहीतडितायुतो हृदयखे स्वानंदधारामुरुवर्षन्राघनवारिदो विजयते भक्तप्यन्नसंवर्धकः ॥ भक्तांश्चातकविभ्रमादनुदिनं पुष्णन्मनः स्तोषयन्बर्होगं सविभूषितो जलधिवद्गंभीरनादः कृती ॥७८॥ सीताशृंगाररम्या मुनिजनकरुणाकुंभकर्णेंद्रुतालं रौद्रारक्षोधिनाथे पुरटमणिमृभी ॥ तियुक्ताकबंधो ॥ ॥ ११

गे

22

बीभत्सा राक्षसीषु प्रहसितनिरता भार्गवे त्यंतवीरा शांता भक्ते मनोज्ञा जयति नवरसस्रग्ध रा राममूर्त्तिः॥ ७९॥ भास्वत्कांतिं द्विजपतिमुखीं मंगलां ग्लस्त ष्टौ मूर्त्तौ सौम्यां गुरुकुचभ रां शुक्र संस्मेरयुक्तां॥ मंदाक्रांतां कबररचने नीलरूपां स्मरस्य यात्रा केतुं जनकतनयां रा मकांतां नमामि॥ ८०॥ शेषोप्यशेषः सुकुमारमूर्त्तिः सीतातिभक्तो विपुलेक्षणोपि॥ सूक्ष्म प्रदर्शी खलु लक्ष्मणोयं वामोपि दक्षो विचकास्तिमान्यः॥ इंद्र॥ ८१॥ शत्रुघ्नं बंधमानं प्रे रक्षोनाथं सखायं कपिपतिमनुजं दासमृक्षं च कीर्त्तौ निघ्नातं वालिपुत्रं श्रवणपरमहं नौ तिदिनचरणध्यानकृत्कैकयीजं वैदेही मातृमात्री स्मृतिनिपुणमरुत्सूनुमर्चानिमग्नं॥ मि चान्यानुहार्दीना॥ स्रग्धरा॥ ८२

पुनः पुना राघवपादमूलं शिलासमुद्धारकमाश्रु वंदे ॥ परिभ्रमत्पंचवटीवनांते समग्र
लावण्यनिधानभूतं ॥ उपेंद्रवज्रा ॥ ८३ ॥ शंखं च चक्रांकुशौ च ध्वजकुलिशयवाः स्वस्ति
कं मीनबिंदू धनुश्चांघ्रिश्वेंदुखंडं सरसिजकलशावष्टकोणं त्रिकोणं ॥ रामांघ्रौ भाति चा
पं विमदमृतनिधिश्चोर्ध्वरेषाप्यस्त्रं जंबूचेत्येकविंशत्यविरतविभवं लक्ष्म सद्रक्षकं
हि ॥ स्रग्धरा ॥ ८४ ॥ शंखं सर्वमेव भवेद्हृदादिनैवेति शंखस्य ॥ ध्यातुर्नरस्य शीघ्रं ब्रह्मला
काराः परिस्फुरति ॥ उपगीतिः ॥ ८५ ॥ तच्चरणांकरथांगाश्रितस्य किं विधिकुलालभव
चक्रं ॥ मनुजस्य मनः कुंभं भ्रमयेच्छ्रुतिदंडसहितमपि ॥ पथ्यार्यावृत्तमेतद् ॥ ८६ ॥ ॥

१२

24

मलदलक्ष्मी। कुशागतमनसः पुंसोभिमानमत्तकरी॥ उद्धतो विषयवने क्रियत संचारमभिमतं किं
या॥ गीतिः॥८७॥ षड्रिपुनिरवधिसैन्यं दुर्लंघ्यमपि स्फुरद्दैत्यसंघातैः॥ ध्वस्तं अचिंतकनरकेतुं
दृष्ट्वा शीघ्रं स्वतो निवर्तेत॥ गीतिः॥८८॥ विषयदुरतिक्रमगिरिः कांतापक्षः प्रचंडगति शाली॥
कुलिशांकल्पातुः किं पुंसो भिंद्यां रीवंद्यां॥ गीतिः॥८९॥ दशरथ वरणनंदनचरणक्षेत्रास्थि

मनःपु

तास्थितयव विवेचकस्य सदा॥ सस्याद्यापि च वस्फुधा तुच्छास्यादापयोधिवशागापि॥९०
स्वात्मिकाचिंतनकर्तुर्नपक्वयोगधिषणस्पदुरगम्यः॥ पद्मासनादियोगः पतंजलिप्रोक्तआ
श्रुसिद्ध्ये हि॥९१॥ अत्युत्कटबलशाली प्रपंचसिंधुस्थदारबालाद्यः॥ मीनादिजंतुवर्गस्तद्व्या
तारं न हि ग्रसिष्येत॥९२॥

श्रीरामचरणवारिजपत्रस्थितबिंदुभक्तिभाजो युक्ते [illegible]। क्षीराद्येकनिधानाः सप्तसमुद्रा अलंक्
ताः सम्यक्॥ ९३॥ जन्मसहस्रैरपि यो दुर्लंघ्यो भवपयोनिधिः सततं। धेन्वंघ्रिभक्तिभाजो गोष्प
दमात्रं क्षणात्स एव स्यात्॥ ९४॥ दाशरथिपदनिविष्टं विधुखंडं ध्यायतो नरेंद्रस्य॥ अष्टौ दुश्चि
न्हितागृहा अपि मदनशरा विहंतुमसमर्थाः॥ ९५॥ तत्पादचिन्हकमलध्यानावेशितहृदं[illegible]
यस्य पुंसः किं। स्वर्गांगनादिभोगप्रभृतिविषयके भवेन्न मलबुद्धिः॥ ९६॥ उद्गीतिः॥ अत्युन्न
तदंभाख्यो विंध्याद्रिः कुंभचिंतकं नमति॥ कलशाभुवमिया विरतं न कदाप्युज्झितमनुजं॥ आ
र्या॥ ९७॥ स्कलभः सदाष्ट मूर्तेः प्रसाद आरादिशाधिपस्यं च॥ अष्टा स्वभक्तिभाजां मणिमा लघि
मादिसिद्धि संघोपि॥ गीतिः॥ ९८॥

विज्ञयिगुणत्रिकमूनं यस्मान्निः संज्ञायं भवेत्तस्य ॥ निर्गुणरूपस्यापि प्राप्तिरहृत्त्रिकोणभ
क्तस्य ॥ ९९ ॥ रघुनायकचरणनभः संबंधि शरासनध्यानुः ॥ स्वानंददृष्टियोगः पुंसः शीघ्रंभ
वेद्रम्यः ॥ उपगीतिः ॥ १०० ॥ श्री [illegible] मद्रघुवीरचरणकमलगगनलक्ष्मचिंतको मनु
जः ॥ दारापत्यादियुगपि न भइवनिर्लेप एव संसारे ॥ गीतिः ॥ १ ॥ साकेताधीशपदांकीभूतस्कुधा
निधेर्ध्याता ॥ पुरुषो नवापि च नि धी न्करोति तुच्छान्स्कुधाकुंभं ॥ उपगीतिः ॥ २ ॥ चरणांकगो
ध्वरेषा चिंतनशाली स्कुषुम्नया नाड्या ॥ शीर्षोपरि हि वितत्य ॥ मितयाधीरो मृतत्वमाभजति ॥
गीतिः ॥ ३ ॥ षट्कोणचिंतकानां मनआदीनींद्रियाणि षड्विषयाः ॥ भगवद्ध्यानविशिष्टं धिष
णां कुर्वंति नापराभूतां ॥ गीतिः ॥ १०४ ॥

जंबूव्याजाग्ज्जंबूद्वीपांकिं रामचंद्रपदलग्नं॥ तच्चिंतकेन भ्रस्थाः सर्वास्तीर्थौघदेवतादृष्टाः॥
५॥ इतिवेदहीनायकचरणांबुजसंस्थमेकविंशातिकं॥ लक्ष्मस्वभक्तिभाजां तावन्नर
कान्निनाशयातिझ्रटिति॥६॥ एकविंशातिदुःखानां ध्वंसंकुर्वतिलीलया॥ एकविंशति
चिन्हानिनराणां भावितात्मनां॥७॥ काश्चित्कंचनसुंदरं नरवरं दृष्ट्वांगुली मोरणाध्वा
नेर्दृष्टिनिवारणं विदधति प्रायोयथाविद्युतः॥ सन्नादैर्विशदैर्मनोज्ञवपुषि त्रैलोक्यमा
न्यतथाश्रीरामेनुगज्जानकी परिवृतेकुर्वंतुदृग्मार्जनं॥ शार्दूलविक्रीडितं॥८॥ श्रीरामा
वयवस्तवमंजरीनवीनावाल्मीकिद्रुमविहतादशास्यहंत्री॥ हृत्कंजेसदयमनःप्रहर्षिणी

ईग्गरु

२६

28

यं कादंबान्वयजनुषा समाहिता हि ॥ ९ ॥ यदीयरसलाभतः स्फुरगणा अमर्त्या बभुर्विरंचिरपि विश्वसृट् समज निक्षणात्सन्नगः ॥ अनंत इति विश्रुतः पदसरोवरं तत्कृता प्रजल्पितमिदं कृपा कलुषबुद्धिकादंबजं ॥ १० ॥ प्रतिश्लोका बद्धाक्षरयुजो गगिरो नरो व्याहर्ता स्यात्प्रतिपदिनमिति व्यासवचनात् ॥ यदेतद्बालेन प्रणयवशतो साधु भणितं पिता यो ध्यानाथः क्षमयतु महत्साहसमिदं ॥ ११ ॥ शिखरिणी ॥ वेदारण्यविवेचनात्मकविता वल्ली रसोद्भाचिंतादुर्लभ्या मम रोगमेनं वरसक्रमा सा प्रदोषापहा ॥ श्रीरामीयकथामृतात्मगुटिकां तापत्रयोत्तापितान्यादात्करुणः प्रजीवयति तं वाल्मीकिवैद्यं नुमः ॥ शार्दूलविक्रीडितं ॥ १२ ॥

पद २

श्रीरामं भरतं ततः कुशलवौ सीतामयोध्याजनान्सौमित्रिं पवनात्मजं कपिगणान्शत्रुघ्नमृक्षेश्वरं ॥ सुग्रीवं च विभीषणं दशरथं भार्यासमेतं मुदा वाल्मीकं मुनिवृंदमाद्यमसकृद्वंदे गुरून्सज्जनान् ॥ १३ ॥ रामायणाय नित्यं पापाद्रिव्यूहवज्राय ॥ सकलभायसर्वलोकाय नमोस्तु संसारवारिधिपोताय ॥ १४ ॥ गोदाविभूषसमेतां युगकलितजनस्थानसंज्ञे पुरेंद्रे कादंबापाख्यवंशास्फुरदमलरुचिश्रेष्ठमुक्ताफलस्य ॥ विद्वन्नारायणस्य प्रथितयतिरुचेरामकृष्णस्तनूजः श्रीमत्कुंज्याख्यविद्यागुरुचरणपरः काव्यमेतच्चकार ॥ स्रग्धरा ॥ १५ ॥ प्रणम्य प्रार्थये संतः संशोध्येयं कृतिः सदा ॥ यदत्र भूषणं तत्स्यात्पुरोः

धूर्त्तस्य नेगु १५

स्याद्दोर्दूषणभागरुं ॥१६॥ शालिवाहनक्षितीशतो विधुत्रिसप्तभूवत्सरे च शुक्रमासिकृ-
ष्णपक्षगे हरौ ॥ शुक्रवासरे कृतिः समाप्तिमागता द्विवाराम कृष्णसंज्ञकद्विजेरामतत्परा ॥ तूर्णकं वृत्तं ॥१७॥ रामकृष्णेन गोविंदवैद्यस्येषा स्कंमंजरी ॥ दुग्नामोदाय भवतु वाल्मीकिद्रुमसंगता ॥१८॥ ॥इति कादंबापराह्वय यतिश्रीभाराजितनारायणापराभिधरामचंद्राश्रमपादशिष्यरामकृष्णविरचिता श्रीरामावयमंजरीस्कंदुरी सहृदयचरणतामरसाछोधनमभ्यर्थयंती चरमवर्णध्वंसाविलसिता श्रीसाकेतपुरवराधीश्वरसप्रणयकटाक्षावलोकनं याचयंती जयति ॥ श्रीरस्तु ॥ ॥

ष्प

१६